तिङन्तेषु हल्सन्धिकार्याणि

हलन्तधातुभ्यः प्रमुखतः स्, त्, थ्, ध् इत्येषु अक्षरेषु परेषु प्रमुखसन्धिकार्याणि भवन्ति | अधः एषां सन्धीनां सङ्ग्रहः |

## सकारादौ प्रत्यये परे सन्धिकार्याणि

| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
|---|---|---|---|---|
| क् + स् | क् + ष् | सकारस्य षत्वम् | आदेशप्रत्यययोः | शक् + स्यति → शक्ष्यति |
| ख् + स् | क् + ष् | खकारस्य चर्त्वेन कः<br>सकारस्य षत्वम् | खरि च<br>आदेशप्रत्यययोः | लेलेख् + सि → लेलेक् + सि<br>→ लेलेक्षि |
| ग् + स् | क् + ष् | गकारस्य चर्त्वेन कः<br>सकारस्य षत्वम् | खरि च<br>आदेशप्रत्यययोः | तात्वङ्ग् + सि → तात्वङ्क् + सि<br>→ तात्वङ्क्षि |
| घ् + स् | क् + ष् | घकारस्य चर्त्वेन कः<br>सकारस्य षत्वम् | खरि च<br>आदेशप्रत्यययोः | जाघघ् + सि → जाघक् + सि →<br>जाघक्षि |
| च् + स् | क् + ष् | चकारस्य कुत्वेन कः<br>सकारस्य षत्वम् | चोः कुः<br>आदेशप्रत्यययोः | पच् + स्यति → पक् + स्यति<br>→ पक्ष्यति |
| छ् + स् | क् + ष् | छकारस्य शत्वं तदा व्रश्चादिना षत्वम्<br>तस्य ककारादेशः<br>सकारस्य षत्वम् | च्छ्वोः शूडनुनासिके<br>व्रश्चभ्रस्जसृज...<br>षढोः कः सि<br>आदेशप्रत्यययोः | प्रच्छ् + स्यति → प्रश् + स्यति<br>→ प्रष् + स्यति<br>→ प्रक् + स्यति<br>→ प्रक्ष्यति |
| ज् + स् | क् + ष् | जकारस्य कुत्वेन गः<br>तस्य चर्त्वेन कः<br>सकारस्य षत्वम् | चोः कुः<br>खरि च<br>आदेशप्रत्यययोः | त्यज् + स्यति → त्यग् + स्यति<br>→ स्यक् + स्यति<br>→ त्यक्ष्यति |
| झ् + स् | क् + ष् | झकारस्य कुत्वेन गः<br>तस्य चर्त्वेन कः<br>सकारस्य षत्वम् | चोः कुः<br>खरि च<br>आदेशप्रत्यययोः | जझर्झ् + सि → जाझर्घ् + सि<br>→ जाझर्क् + सि<br>→ जाझर्क्षि |
| ट् + स् | ट् + स् | टकारस्य चर्त्वे टकार एव भवति | ष्टुना ष्टुः | नानट् + सि → नानट्षि |
| ठ् + स् | ट् + स् | ठकारस्य चर्त्वेन टकारः | ष्टुना ष्टुः<br>खरि च | लोलुण्ठ् + सि → लोलुण्ठ् + षि<br>→ लोलुण्ट्षि |
| ड् + स् | ट् + स् | डकारस्य चर्त्वेन टकारः | ष्टुना ष्टुः<br>खरि च | जागण्ड् + सि → जागण्ड् + षि<br>→ जागण्ट्षि |
| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
| ढ् + स् | क् + स् | ढकारस्य ककारादेशः<br>सकारस्य षत्वम् | षढोः कः सि<br>आदेशप्रत्यययोः | लेढ् + सि → लेक् + सि<br>→ लेक्षि |
| त् + स् | त् + स् | तकारस्य चर्त्वे तकार एव भवति | खरि च | चाचत् + सि → चाचत्सि |
| थ् + स् | त् + स् | थकारस्य चर्त्वेन तकारः | खरि च | सामन्थ् + सि → सामन्त्सि |
| द् + स् | त् + स् | दकारस्य चर्त्वेन तकारः | खरि च | अद् + सि → अत्सि |
| ध् + स् | त् + स् | धकारस्य चर्त्वेन तकारः | खरि च | क्रोध् + स्यति → क्रोत्स्यति |
| न् + स् | ं + स् | नकारस्य अनुस्वारादेशः | नश्चापदान्तस्य झलि | मन् + स्यते → मंस्यते |

| | | | | |
|---|---|---|---|---|
| प् + स् | प् + स् | पकारस्य चर्त्वे पकार एव भवति | खरि च | तप् + स्यति → तप्स्यति |
| फ् + स् | प् + स् | फकारस्य चर्त्वेन पकारः | खरि च | जोगुम्फ् + सि → जोगुम्प्सि |
| ब् + स् | प् + स् | बकारस्य चर्त्वेन पकारः | खरि च | लालम्ब् + सि → लालम्प्सि |
| भ् + स् | प् + स् | भकारस्य चर्त्वेन पकारः | खरि च | लभ् + स्यते → लप्स्यते |
| म् + स् | ◌ं + स् | मकारस्य अनुस्वारादेशः | नश्चापदान्तस्य झलि | रम् + स्यते → रंस्यते |
| य् + स् | स् | यकारस्य लोपः | लोपो व्योर्वलि | जाहय् + सि → जाहसि |
| र् + स् | र् + ष् | रेफस्य किमपि कार्यं न, सकारस्य षत्वम् | आदेशप्रत्यययोः | जागृ + सि → जागर्षि |
| ल् + स् | ल् + ष् | लकारस्य किमपि कार्यं न, सकारस्य षत्वम् | आदेशप्रत्यययोः | पम्फुल् + सि → पम्फुल्षि* |
| व् + स् | स् | वकारस्य लोपः | लोपो व्योर्वलि | अवसरः नास्ति |
| श् + स् | क् + ष् | शकारस्य व्रश्चादिना षः, तस्य ककारादेशः, सकारस्य षत्वम् | व्रश्चभ्रस्जसृज...<br>षढोः कः सि<br>आदेशप्रत्यययोः | क्रोश् + स्यति → क्रोष् + स्यति<br>→ क्रोक् + स्यति<br>→ क्रोक्ष्यति |
| ष् + स् | क् + ष् | षकारस्य ककारादेशः, सकारस्य षत्वम् | षढोः कः सि<br>आदेशप्रत्यययोः | चरीकर्ष + सि → सरीकर्क् + सि<br>→ चरीकर्क्षि |
| स् + स् | स् + स्<br>त् + स् | १. सार्वधातुके सकारे परे न किमपि<br>२. आर्धधातुके सकारे परे पूर्वसकारस्य तकारादेशः | <br><br>सः स्यार्धधातुके | चकास् + सि → चकास्सि<br><br>वस् + स्यति → वत्स्यति |

| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
|---|---|---|---|---|
| ह् + स् | क् + ष् | १. हकारस्य ढकारः, तस्य ककारादेशः, सकारस्य षत्वम् | हो ढः<br>षढोः कः सि<br>आदेशप्रत्यययोः | लिह् → लेह् + सि → लेढ् + सि<br>→ लेक् + सि<br>→ लेक्षि |
| | क् + ष् | २. यदि धातुः दकारादिः, तर्हि हकारस्य घकारः, दकारस्य भष्भावः, घकारस्य चर्त्वेन ककारः, सकारस्य षत्वम् | दादेर्धातोर्घः<br>एकाचो बशो...<br>खरि च<br>आदेशप्रत्यययोः | दुह् → दोह् + स्यति → दोघ् + स्यति<br>→ धोघ् + स्यति<br>→ धोक् + स्यति<br>→ धोक्ष्यति |
| | क् + ष् | ३. द्रुह्, मुह्, स्नुह्, स्निह् एषां धातूनां हकारस्य विकल्पेन घकारः, तस्य चर्त्वेन ककारः, सकारस्य षत्वम्<br><br>पक्षे ढकारः, तस्य ककारादेशः, सकारस्य षत्वम् | वा द्रुहमुहष्णुहष्णिहाम्<br>खरि च<br>आदेशप्रत्यययोः<br><br>हो ढः<br>षढोः कः सि<br>आदेशप्रत्यययोः | मुह् → मोह् + स्यति → मोघ् + स्यति<br>→ मोक् + स्यति<br>→ मोक्ष्यति<br><br>मोह् + स्यति → मोढ् + स्यति<br>→ मोक् + स्यति<br>→ मोक्ष्यति |

| | | | | |
|---|---|---|---|---|
| | क् + ष् | ४. नह्–धातोः हकारस्य धकारादेशः, तस्य चर्त्वेन तकारः | नहो धः<br>खरि च | नह् + स्यति → नध् + स्यति<br>→ नत्स्यति |

<u>अयं सङ्ग्रहः</u>

| पूर्ववर्णाः | आदेशः |
|---|---|
| क्, ख्, ग्, घ्, च्, छ्, ज्, झ्, ढ्, श्, ष्, ह् | क् |
| ट्, ठ्, ड् | ट् |
| त्, थ्, द्, ध् | त् |
| प्, फ्, ब्, भ् | प् |
| म्, न् | अनुस्वारः |
| य्, व् | लोपः |
| र्, ल् | न किमपि |
| स् | सार्वधातुके सकारे न किमपि,<br>आर्धधातुके परे तकारः |

## <u>तकारादि–थकारादि–प्रत्यययोः परयोः सन्धिकार्याणि</u>

| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
|---|---|---|---|---|
| क् + त्/थ् | क् + त्/थ् | ककारस्य चर्त्वे ककार एव भवति | खरि च | शक् + ता → शक्ता |
| ख् + त्/थ् | क् + त्/थ् | खकारस्य चर्त्वेन ककारः | खरि च | लेलेख् + ति → लेलेक् + ति<br>→ लेलेक्ति |
| ग् + त्/थ् | क् + त्/थ् | गकारस्य चर्त्वेन ककारः | खरि च | तात्वङ्ग् + ति → तात्वङ्क् + ति<br>→ तात्वङ्क्ति |
| घ् + त्/थ् | ग् + ध् | तथयोः धकारादेशः, घकारस्य जश्त्वेन गकारः | झषस्तथोर्धोऽधः<br>झलां जश् झशि | जाघघ् + ति → जाघग् + धि<br>→ जाघग्धि |
| च् + त्/थ् | ष् + ट्/ठ् | १) व्रश्च्–धातोः षत्वम्,<br>तथयोः ष्टुत्वम् | व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः | व्रश्च् + ता → व्रष् + ता<br>→ व्रष्टा |
| | क् + त्/थ् | २) अन्येषां चकारान्तानां कुत्वेन ककारः | चोः कुः | पच् + ता → पक्ता |
| छ् + त्/थ् | ष् + ट्/ठ् | १) तुक्–सहित–छकारास्य शत्वं, तदा षत्वम्; तथयोः ष्टुत्वम् | च्छ्वोः शूडनुनासिकेच<br>व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः | प्रच्छ् + ता → प्रष् + ता<br>→ प्रष्टा |
| | क् + त्/थ् | २) तुक्–रहित–छकारास्य कुत्वं, खकारस्य चर्त्वेन ककारः | चोः कुः<br>खरि च | वावाञ्छ् + ति → वावांख् + ति<br>→ वावांक् + ति<br>→ वावाङ्क्ति |
| ज् + त्/थ् | ष् + ट्/ठ् | १) व्रश्चादिगणे पठितानां षत्वम्, | व्रश्चभ्रस्ज... | यज् + ता → यष् + ता |

| | | | | |
|---|---|---|---|---|
| | | तथयोः ष्टुत्वम् | ष्टुना ष्टुः | → यष्टा |
| | क् + त्/थ् | २) अन्येषां धातूनां जकारस्य कुत्वेन गः, तस्य चर्त्वेन ककारः | चोः कुः<br>खरि च | त्यज् + ता → त्यग् + ता<br>→ त्यक्ता |
| झ् + त्/थ् | ग् + ध् | तथयोः धकारादेशः,<br>झकारस्य कुत्वेन घकारः,<br>तस्य जश्त्वेन गकारः | झषस्तथोर्धोऽधः<br>चोः कुः<br>झलां जश् झशि | जाझर्झ् + ति → जाझर्झ् + धि<br>→ जाझर्घ् + धि<br>→ जाझर्ग्धि |
| ट् + त्/थ् | ट् + ट्/ठ् | तथयोः ष्टुत्वम् | ष्टुना ष्टुः | नानट् + ति → नानट्टि |
| ठ् + त्/थ् | ट् + ट्/ठ् | तथयोः ष्टुत्वम्,<br>ठकारस्य चर्त्वेन ट्कारः | ष्टुना ष्टुः<br>खरि च | लोलुण्ठ् + ति → लोलुण्ठ् + टि<br>→ लोलुण्ट्टि |
| ड् + त्/थ् | ट् + ट्/ठ् | तथयोः ष्टुत्वम्,<br>डकारस्य चर्त्वेन ट्कारः | ष्टुना ष्टुः<br>खरि च | जागण्ड् + ति → जागण्ड् + टि<br>→ जागण्ट्टि |
| ढ् + त्/थ् | ढ् | तथयोः धकारादेशः,<br>धकारस्य ष्टुत्वेन ढकारः,<br>पूर्वढकारस्य लोपः | झषस्तथोर्धोऽधः<br>ष्टुना ष्टुः<br>ढो ढे लोपः | लेढ् + ता → लेढ् + धा<br>→ लेढ् + ढा<br>→ ले + ढा<br>→ लेढा |
| **पूर्ववर्णः** | **आदेशः** | **कार्यम्** | **सूत्रम्** | **उदाहरणम्** |
| त् + त्/थ् | त् + त्/थ् | तकारस्य चर्त्वेन तकार एव | खरि च | चाचत् + ति → चाचत्ति |
| थ् + त्/थ् | त् + त्/थ् | थकारस्य चर्त्वेन तकारः | खरि च | मामन्थ् + ति → मामन्त्ति |
| द् + त्/थ् | त् + त्/थ् | दकारस्य चर्त्वेन तकारः | खरि च | अद् + ति → अत्ति |
| ध् + त्/थ् | द् + ध् | तथयोः धकारादेशः,<br>पूर्वधकारस्य जश्त्वेन दकारः | झषस्तथोर्धोऽधः<br>झलां जश् झशि | क्रोध् + ता → क्रोध् + धा<br>→ क्रोद्धा |
| प् + त्/थ् | प् + त्/थ् | पकारस्य चर्त्वेन पकार एव | खरि च | तप् + ता → तप्ता |
| फ् + त्/थ् | प् + त्/थ् | फकारस्य चर्त्वेन पकारः | खरि च | जोगुम्फ् + ति → जोगुम्प्ति |
| ब् + त्/थ् | प् + त्/थ् | बकारस्य चर्त्वेन पकारः | खरि च | लालम्ब् + ति → लालम्प्ति |
| भ् + त्/थ् | ब् + ध् | तथयोः धकारादेशः,<br>भकारस्य जश्त्वेन बकारः | झषस्तथोर्धोऽधः<br>झलां जश् झशि | लभ् + ता → लभ् + धा<br>→ लब्धा |
| य् + त्/थ् | त्/थ् | यकारस्य लोपः | लोपो व्योर्वलि | जाहय् + ति → जाहति |
| र् + त्/थ् | र् + त्/थ् | किमपि कार्यं न | | जागृ + ति → जागर्ति |
| ल् + त्/थ् | ल् + त्/थ् | किमपि कार्यं न | | पम्फुल् + ति → पम्फुल्ति* |
| व् + त्/थ् | त्/थ् | वकारस्य लोपः | लोपो व्योर्वलि | अवसरः नास्ति |
| श् + त्/थ् | ष् + ट्/ठ् | शकारस्य व्रश्चादिना षत्वम्,<br>तथयोः ष्टुत्वम् | व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः | क्रोश् + ता → क्रोष् + ता<br>→ क्रोष्टा |
| ष् + त्/थ् | ष् + ट्/ठ् | तथयोः ष्टुत्वम् | ष्टुना ष्टुः | चरीकर्ष् + ति → चरीकर्ष्टि |
| स् + त्/थ् | स् + त्/थ् | किमपि कार्यं न | | चाकस् + ति → चाकस्ति |

| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
|---|---|---|---|---|
| ह् + त्/थ् | ढ् | १. हकारस्य ढकारः, तथयोः धकारादेशः, धकारस्य ष्टुत्वेन ढकारः, पूर्वढकारस्य लोपः | हो ढः<br>झषस्तथोर्धोऽधः<br>ष्टुना ष्टुः<br>ढो ढे लोपः | लिह् → लेह् + ति → लेढ् + ति<br>→ लेढ् + धि<br>→ लेढ् + ढि<br>→ लेढि |
| | ग् + ध् | २. यदि धातुः दकारादिः, तर्हि हकारस्य घकारः, तथयोः धकारादेशः, घकारस्य जश्त्वेन गः | दादेर्धातोर्घः<br>झषस्तथोर्धोऽधः<br>झलां जश् झशि | दुह् + ते → दुघ् + ते<br>→ दुघ् + धे<br>→ दुग्धे |
| | ग् + ध्<br><br><br><br>ढ् | ३. द्रुह्, मुह्, स्नुह्, स्निह् एषां धातूनां हकारस्य विकल्पेन घकारः, तथयोः धकारादेशः, घकारस्य जश्त्वेन गः<br><br>पक्षे हकारस्य ढकारः, तथयोः धकारादेशः, धकारस्य ष्टुत्वेन ढकारः, पूर्वढकारस्य लोपः | वा<br>द्रुहमुहष्णुहष्णिहाम्<br>झषस्तथोर्धोऽधः<br>झलां जश् झशि<br><br>हो ढः<br>झषस्तथोर्धोऽधः<br>ष्टुना ष्टुः<br>ढो ढे लोपः | द्रुह् → द्रोह् + ता → द्रोघ् + ता<br>→ द्रोघ् + धा<br>→ द्रोग्धा<br><br><br>द्रुह् → द्रोह् + ता → द्रोढ् + ता<br>→ द्रोढ् + धा<br>→ द्रोढ् + ढा<br>→ द्रोढा |
| | द् + ध् | ४. नह्–धातोः हकारस्य धकारादेशः, तथयोः धकारादेशः, पूर्वधकारस्य जश्त्वेन दः | नहो धः<br>झषस्तथोर्धोऽधः<br>झलां जश् झशि | नह् + ता → नध् + ता<br>→ नध् + धा<br>→ नद्धा |

<u>अयं सङ्ग्रहः</u>

| पूर्ववर्णाः | आदेशः |
|---|---|
| घ्, झ्, ध्, भ् | तथयोः धकारादेशः, पूर्वस्य जश्त्वम् |
| ढ् | तथयोः धकारादेशः, ष्टुत्वम्, ढलोपः |
| व्रश्चादिसूत्रे पठिताः धातवः, छ्, श् | षत्वम्, तथयोः ष्टुत्वम् |
| क्, ख्, ग् | चर्त्वम् |
| च्, ज् | कुत्वम्, चर्त्वम् |
| ट्, ठ्, ड् | चर्त्वम्, तथयोः ष्टुत्वम् |
| त्, थ्, द् | चर्त्वम् |
| प्, फ्, ब् | चर्त्वम् |
| य्, व् | लोपः |
| र्, ल् | न किमपि |
| ष् | तथयोः ष्टुत्वम् |
| स् | न किमपि |

| | |
|---|---|
| ह् | ढकारः/घकारः, तथयोः धकारादेशः, ढघयोः जश्त्वम् |

## धकारादौ प्रत्यये परे सन्धिकार्याणि

| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
|---|---|---|---|---|
| क् + ध् | ग् + ध् | ककारस्य जश्त्वेन गकारः | झलां जश् झशि | शाशक् + धि → शाशग्धि |
| ख् + ध् | ग् + ध् | खकारस्य जश्त्वेन गकारः | झलां जश् झशि | लेलिख् + धि → लेलिग्धि |
| ग् + ध् | ग् + ध् | गकारस्य जश्त्वेन गकारः एव | झलां जश् झशि | तात्वङ्ग् + धि → तात्वङ्ग्धि |
| घ् + ध् | ग् + ध् | घकारस्य जश्त्वेन गकारः | झलां जश् झशि | लालङ्घ् + धि → लालङ्ग्धि |
| च् + ध् | ग् + ध् | १) चकारस्य कुत्वेन ककारः,<br>ककारस्य जश्त्वेन गकारः | चोः कुः<br>झलां जश् झशि | पापच् + धि → पापक् + धि<br>→ पापग्धि |
| | ड् + ढ् | २) व्रश्च्–धातोः व्रश्चादिना षत्वं, धकारस्य ष्टुत्वेन ढकारः, षकारस्य जश्त्वेन डकारः | व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः<br>झलां जश् झशि | वाव्रश्च् + धि → वाव्रष् + धि<br>→ वाव्रष् + ढि<br>→ वाव्रड्ढि |
| छ् + ध् | ड् + ढ् | छकारस्य शत्वं तदा षत्वं, धकारस्य ष्टुत्वेन ढकारः, षकारस्य जश्त्वेन डकारः | च्छ्वोः शूडनुनासिके<br>व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः<br>झलां जश् झशि | पाप्रच्छ् + धि → पाप्रश् + धि<br>→ पाप्रष् + धि<br>→ पाप्रष् + ढि<br>→ पाप्रड्ढि |
| | ग् + ध् | छकारस्य कुत्वं तदा जश्त्वम् | चोः कुः<br>झलां जश् झशि | वावाञ्छ् + धि → वावांख् + धि<br>→ वावाङ्ग्धि |
| ज् + ध् | ग् + ध् | १) जकारान्तानां कुत्वेन गकारः,<br>गकारस्य जश्त्वेन गकारः एव | चोः कुः<br>झलां जश् झशि | नेनिज् + धि → नेनिग् + धि<br>→ नेनिग्धि |
| | क् + ध् | २) व्रश्चादिगणे पठितानां षत्वं, धकारस्य ष्टुत्वेन ढकारः, षकारस्य जश्त्वेन डकारः | व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः<br>झलां जश् झशि | यायज् + धि → यायष् + धि<br>→ यायष् + ढि<br>→ यायड्ढि |
| झ् + ध् | ग् + ध् | झकारान्तानां कुत्वेन घकारः,<br>ककारस्य जश्त्वेन गकारः | चोः कुः<br>झलां जश् झशि | जाझर्झ् + धि → जाझर्घ् + धि<br>→ जाझर्ग्धि |
| ट् + ध् | ड् + ढ् | धकारस्य ष्टुत्वेन ढकारः, टकारस्य जश्त्वेन डकारः | ष्टुना ष्टुः<br>झलां जश् झशि | लोलुट् + धि → लोलुट् + ढि<br>→ लोलुड्ढि |
| ठ् + ध् | ड् + ढ् | धकारस्य ष्टुत्वेन ढकारः, ठकारस्य जश्त्वेन डकारः | ष्टुना ष्टुः<br>झलां जश् झशि | पापठ् + धि → पापठ् + ढि<br>→ पापड्ढि |
| ड् + ध् | ड् + ढ् | धकारस्य ष्टुत्वेन ढकारः | ष्टुना ष्टुः | ईड् + ध्वे → ईड्ढ्वे |
| ढ् + ध् | ढ् | धकारस्य ष्टुत्वेन ढकारः,<br>पूर्वढकारस्य लोपः | ष्टुना ष्टुः<br>ढो ढे लोपः | तृणेढ् + धि → तृणेढ् + ढि<br>→ तृणेढि |
| **पूर्ववर्णः** | **आदेशः** | **कार्यम्** | **सूत्रम्** | **उदाहरणम्** |
| त् + ध् | द् + ध् | तकारस्य जश्त्वेन दकारः | झलां जश् झशि | कृन्त् + धि → कृन्द्धि |
| थ् + ध् | द् + ध् | थकारस्य जश्त्वेन दकारः | झलां जश् झशि | मामन्थ् + धि → मामन्द्धि |
| द् + ध् | द् + ध् | दकारस्य जश्त्वेन दकारः | झलां जश् झशि | अद् + धि → अद्धि |

| | | | | |
|---|---|---|---|---|
| ध् + ध् | द् + ध् | दकारस्य जश्त्वेन दकारः | झलां जश् झशि | रुन्ध् + धि → रुन्द्धि |
| प् + ध् | ब् + ध् | पकारस्य जश्त्वेन बकारः | झलां जश् झशि | चेक्षिप् + धि → चेक्षिब्धि |
| फ् + ध् | ब् + ध् | फकारस्य जश्त्वेन बकारः | झलां जश् झशि | जोगुम्फ् + धि → जोगुम्ब्धि |
| ब् + ध् | ब् + ध् | बकारस्य जश्त्वेन बकारः | झलां जश् झशि | लालम्ब् + धि → लालम्ब्धि |
| भ् + ध् | ब् + ध् | भकारस्य जश्त्वेन बकारः | झलां जश् झशि | रारभ् + धि → रारब्धि |
| श् + ध् | ड् + ध् | शकारस्य व्रश्चादिना षत्वं, धकारस्य ष्टुत्वेन ढकारः, षकारस्य जश्त्वेन डकारः | व्रश्चभ्रस्ज...<br>ष्टुना ष्टुः<br>झलां जश् झशि | नानश् + धि → नानष् + धि<br>→ नानष् + ढि<br>→ नानड्ढि |
| ष् + ध् | ड् + ध् | धकारस्य ष्टुत्वेन ढकारः, षकारस्य जश्त्वेन डकारः | ष्टुना ष्टुः<br>झलां जश् झशि | लालष् + धि → लालष् + ढि<br>→ लालड्ढि |
| स् + ध् | ध् | सकारस्य लोपः | धि च | वावस् + धि → वावधि |

| पूर्ववर्णः | आदेशः | कार्यम् | सूत्रम् | उदाहरणम् |
|---|---|---|---|---|
| ह् + ध् | ढ् | १. हकारस्य ढकारः, धकारस्य ष्टुत्वेन ढकारः, पूर्वढकारस्य लोपः, लुप्तढकारात् पूर्वस्य अणः दीर्घः | हो ढः<br>ष्टुना ष्टुः<br>ढो ढे लोपः<br>ढ्रलोपे पूर्वस्य दीर्घोऽणः | लिह् + धि → लिढ् + धि<br>→ लिढ् + ढि<br>→ लिढि<br>→ लीढि |
| | | १अ. हकारस्य ढकारः, धकारस्य ष्टुत्वेन ढकारः, पूर्वढकारस्य लोपः, लुप्तढकारात् पूर्वस्य अकारस्य ओत्वम् (सासह् + धि → सासोढि) | हो ढः<br>ष्टुना ष्टुः<br>ढो ढे लोपः<br>सहिवहोरोदवर्णस्य | वावह् + धि → वावढ् + धि<br>→ वावढ् + ढि<br>→ वावढि<br>→ वावोढि |
| | ग् + ध् | २. यदि धातुः दकारादिः, तर्हि हकारस्य घकारः, घकारस्य जश्त्वेन गः | दादेर्धातोर्घः<br>झलां जश् झशि | दुह् + धि → दुघ् + धि<br>→ दुग्धि |
| | ग् + ध्<br>(+ भष्भावः) | २अ. दकारादि–हकारान्तः, ध्वे परे, तर्हि हकारस्य घकारः, आदौ बशः भष्, तदा घकारस्य जश्त्वेन गः | दादेर्धातोर्घः<br>एकाचो बशो भष्<br>झषन्तस्य स्ध्वोः<br>झलां जश् झशि | दिह् + ध्वे → दिघ् + ध्वे<br>→ धिघ् + ध्वे<br>→ धिग्ध्वे |
| | ग् + ध्<br><br><br><br>ढ् | ३. द्रुह्, मुह्, स्नुह्, स्निह्<br>एषां धातूनां हकारस्य विकल्पेन घकारः, घकारस्य जश्त्वेन गः<br><br>पक्षे हकारस्य ढकारः, धकारस्य ष्टुत्वेन ढकारः, पूर्वढकारस्य लोपः, लुप्तढकारात् पूर्वस्य अणः दीर्घः | वा<br>द्रुहमुहष्णुहष्णिहाम्<br>झलां जश् झशि<br><br>हो ढः<br>ष्टुना ष्टुः<br>ढो ढे लोपः<br>ढ्रलोपे पूर्वस्य दीर्घोऽणः | द्रुह् + धि → द्रुघ् + धि<br>→ द्रुग्धि<br><br><br>द्रुह् + धि → द्रुढ् + धि<br>→ द्रुढ् + ढि<br>→ द्रुढि<br>→ द्रूढि |
| | द् + ध् | ४. नह्–धातोः हकारस्य धकारादेशः, | नहो धः | नानह् + धि → नानध् + धि |

| | | | | |
|---|---|---|---|---|
| | | पूर्वधकारस्य जश्त्वेन दः | झलां जश् झशि | → नानद्धि |

*पम्फुल् + सि → पम्फुल्षि | अत्र प्रश्नः उदेति किमर्थं गुणो न स्यात् |

अस्य अवगमनार्थं यङ्लुगन्तधातुः पम्फुल् कथं निष्पद्यते इति बोध्यम् |

फल् → फल् फल् → प फल् → पम्फल् → पम्फुल् इति यङ्लुगन्तधातुः

अत्र **चरफलोश्च** (७.४.८७) इत्यनेन अभ्यासस्य नुक्–आगमः, तदा **उत्परस्यातः** (७.४.८८) इत्यनेन अभ्यासात् परस्य ह्रस्व–अकारस्य स्थाने उत्–आदेशः | एताभ्यां सूत्राभ्यां पम्फुल् इति यङ्लुगन्तधातुः भवति | उत्–आदेशस्य तपरसामर्थ्यात् गुणो न भवति | यदि गुणः इष्यते स्म, 'उ' इत्यस्य कथनेन पर्याप्तम् आसीत्; तदा गुणः अभविष्यत् | गुणकार्यस्य निवारणार्थं तपरकरणं कृतम् | भाव्यमानोऽप्युकारः सवर्णान् न गृह्णाति इति परिभाषा | विधीयमानः यः अण्–वर्णः, तस्य सवर्णग्रहणं न भवति | अन्यच्च तपरशास्त्रम् अन्तरङ्गं; गुणकार्यं बहिरङ्गम् | तस्मात् गुणकार्यमत्र असिद्धम् |

**चरफलोश्च** (७.४.८७) = चर्, फल्, इत्यनयोः धात्वोः अभ्यासस्य नुक्–आगमो भवति यङि यङ्लुकि च | इदं सूत्रं पृथक्तया उक्तं येन अग्रे केवलं चर्, फल्, इत्यनयोः **उत्परस्यातः** (७.४.८८) इत्यनेन अभ्यासोत्तर–अतः उत्त्वं स्यात् | चरश्च फल् च तोरितरेतरद्वन्द्वः चरफलौ, तयोः चरफलोः | चरफलोः षष्ठ्यन्तं, चाव्ययं, द्विपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य अनुवृत्तिः | **गुणो यङ्लुकोः** (७.४.८२) इत्यस्मात् **यङ्लुकोः** इत्यस्य अनुवृत्तिः | **नुगतोऽनुनासिकान्तस्य** (७.४.८५) इत्यस्मात् **नुक्** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **चरफलोः च अङ्गस्य अभ्यासस्य नुक् यङ्लुकोः** |

**उत्परस्यातः** (७.४.८८) = चर्, फल्, इत्यनयोः धात्वोः अभ्यासात् परस्य ह्रस्व–अकारस्य स्थाने उत् आदेशो भवति यङि यङ्लुकि च | उत् प्रथमान्तं, परस्य षष्ठ्यन्तम्, अतः षष्ठ्यन्तं, त्रपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य विभक्तिपरिणामं कृत्वा **अभ्यासात्** इति अनुवृत्तिः | **चरफलोश्च** (७.४.८७) इत्यस्मात् **चरफलोः** इत्यस्य अनुवृत्तिः | **गुणो यङ्लुकोः** (७.४.८२) इत्यस्मात् **यङ्लुकोः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **चरफलोः च अङ्गस्य अभ्यासात् परस्य अतः उत् यङ्लुकोः** |

परन्तु—

चर् → चर् चर् → च चर् → चञ्चर् → चञ्चुर् इति यङ्लुगन्तधातुः

चञ्चुर् + ति → **हलि च** (८.२.७७) → चञ्चूर्ति

अत्र किमर्थं दीर्घत्वं न निवारितम् ?

**हलि च** (८.२.७७) = रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्–वर्णः दीर्घो भवति हलि परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तदन्तविधिः अतः **र्वोः** इत्यनेन येषाम् धातूनाम् अन्ते रेफः वकारश्च, तेषां ग्रहणम् | हलि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **सिपि धातो रुर्वा** (८.२.७४) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः; **र्वोरुपधाया दीर्घ इकः** (८.२.७६) इत्यस्य पूर्णतया अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **र्वोः धातोः उपधायाः इकः दीर्घः हलि** |

प्रश्नः अस्ति यत् तपकरणस्य सामर्थ्यात् यया रीत्या गुणः निवारितः, किमर्थं न एवमेव चञ्चुर् + ति इति स्थितौ **हलि च** (८.२.७७) इत्यनेन यः दीर्घादेशः प्रसक्तः, सोऽपि निवारितो भवेत् किल | अत्र किन्तु **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **उत्परस्यातः** (७.४.८८) इत्यस्य दृष्ट्या **हलि च** (८.२.७७) इत्यस्य अस्तित्वं नास्ति अतः **उत्परस्यातः** (७.४.८८) इति सूत्रद्वारा यत् तपकरणस्य सामर्थ्यं, तद्द्वारा बाधा न सम्भ्वति | किमर्थमिति चेत्, उच्यते | **पूर्वत्रासिद्धम्** (८.२.१) इत्यस्य द्विविधं कार्यम् अस्माभिः अधीतं— शास्त्रासिद्धं, कार्यासिद्धञ्च | शास्त्रासिद्धं भवति यत्र सूत्रद्वयं युगपत् प्रसक्तं; तत्र पूर्वसूत्रं प्रति त्रिपाद्यां स्थितं परसूत्रम् असिद्धिम् | अपि च त्रिपाद्यां स्थितस्य परसूत्रस्य कार्यं पूर्वमेव जातमिति चेत्, तत्र पूर्वसूत्रं प्रति तच्च कार्यम् असिद्धम् | नाम यद्यपि कार्यं जातं, तथापि न दृश्यते पूर्वसूत्रेण | अधुना अनयोः द्विविधयोः कार्ययोः मध्ये अत्र प्रकृतस्थितिः उभयत्रापि न सङ्गच्छते | यतोहि द्वयोः प्रसक्तिः युकपत् नस्ति अपि च यस्य

(**उत्परस्यातः** (७.४.८८) इत्यस्य) कार्यं जातं; तत्सूत्रं तु **हलि च** (८.२.७७) प्रति पूर्वसूत्रं न तु परसूत्रम् | तर्हि न शास्त्रासिद्धं, न वा कार्यासिद्धम् |

किन्तु वस्तुतस्तु भाष्यकारेण उच्यते यत् **पूर्वत्रासिद्धम्** (८.२.१) इत्यस्य एकविधमेव कार्यं वर्तते; द्वैविद्ध्यमिव विभजनं न करणीयम् | यत्र कुत्रापि द्वयोः सूत्रयोर्मध्ये एकं सूत्रं त्रिपाद्यां, तत्र **पूर्वत्रासिद्धम्** (८.२.१) इति सूत्रप्रसङ्गे चिन्तनीयं भवति | 'द्विविधमेव, दिविधमेव' इति वदामश्चेत् समस्या भवति, यथा अत्र | अतः शिक्षणस्य आरम्भे सुखबोधार्थं **पूर्वत्रासिद्धम्** (८.२.१) इत्यस्य द्वैविध्यं बोधनार्थं लाभाय इति तु अस्त्यवश्यं; किन्तु अन्ततोः गत्वा यदा द्विविधं कर्यं बुद्धं, तदा सम्पूर्णकथायाः अवगमनार्थं तच्च द्वैविध्यं त्यक्त्वा इतोऽपि विशालबोधः आपनीयः | यथा अत्र— **पूर्वत्रासिद्धम्** इत्यनेन **हलि च** (८.२.७७) इत्यस्य अस्तित्वं नास्ति **उत्परस्यातः** (७.४.८८) इत्यस्य दृष्टया अतः **उत्परस्यातः** (७.४.८८), **हलि च** (८.२.७७) इत्यस्य कार्यं बाधितुं न शक्नोति | तदर्थं **हलि च** (८.२.७७) कार्यं करोति, रूपं भवति चञ्चूर्ति |

Swarup – July 2015 (अस्मिन् करपत्रे यानि कोष्ठकानि सन्ति, तानि साक्षात् मातृभिः दीक्षितपुष्पाभिः विरचितानि)